This PDF you are browsing now is a digitized copy of rare books and manuscripts from the Jnanayogi Dr. Shrikant Jichkar Knowledge Resource Center Library located in Kavikulaguru Kalidas Sanskrit University Ramtek, Maharashtra.

KKSU University (1997- Present) in Ramtek, Maharashtra is an institution dedicated to the advanced learning of Sanskrit.
The University Collection is offered freely to the Community of Scholars with the intent to promote Sanskrit Learning.

Website
https://kksu.co.in/

Digitization was executed by NMM

https://www.namami.gov.in/

Sincerely,

Prof. Shrinivasa Varkhedi
Hon'ble Vice-Chancellor

Dr. Deepak Kapade
Librarian

Digital Uploaded by eGangotri Digital Preservation Trust, New Delhi
https://egangotri.wordpress.com/

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

Acc. No. ~~3705~~ M-1610, Title - कालेन्दुशेखर, Author - ?, Date - ?

Sub - धर्मशास्त्र

folio - 1

Xerox - 1

Acc. No. 3705.

श्रीगणेशायनमः अथप्रारंभः कालेंदुशेखरग्रंथलिख्यते इदानींप्रासंगिके
नाधिकलुप्तवत्सरयोर्लक्षणमुच्यते तत्रकालनिर्णयेसविनियोगबार्हस्पत्यानंतरं
अनेनबार्हस्पत्यमानेनकदाचिदधिकवत्सरोनिष्पद्यतइत्युक्त्वागुरोर्मध्यमसंक्रांति
हीनोयश्चांद्र[illegible]वत्सरः अधिसंवत्सरस्तस्मिन्कार्यंनसवत्रयंवर्जनीयाप्रयत्नेन
प्रतिष्ठासर्वनाकिनां स्फुटसंक्रांतिहीनश्चेत्केप्याहुरधि[illegible]मासवदित्युत्तरंसोरमुराज
हारमाधवः तेनयस्मिन्प्रभवादिचांद्रसंवत्सरेमध्यस्फुटान्यतरगत्यागुरोराश्यंतरप्रवे
शोनविद्यतेसोऽधिकसंवत्सरइतिसचराश्यंतरप्रवेशोद्विविधः मध्यस्फुटगतिमान

का०स्व० भेदात् तत्रयस्मिंश्चांद्रसंवत्सरेमध्यगत्यागुरोराश्यंतरप्रवेशोनभवतिसोयमधिवत्स
१ रोमूर्त्तिप्रतिष्ठाबृहस्पतिसवादिप्रतिबंधकरइतिप्रतिभाति माधवोप्याह मध्यम
गणनयागुरोःसंक्रांतिर्यस्मिंश्चांद्रसंवत्सरेनविद्यतेसोयमधिवत्सरस्तत्रबृहस्प
तिसवाधिकंनकार्यमिति यत्रतुस्पष्टगत्याराश्यंतरप्रवेशोगुरोर्नभवतिसोयम
धिसंवत्सरोधिमासवद्विवाहाद्यनेककर्मप्रतिबंधकरइतिप्रतीयते माधवोप्या
ह स्फुटगणनयाबृहस्पतिसंक्रांतिरहितोयश्चांद्रोवत्सरस्तस्मिन्नधिमासवत्का श्री०
म्यादिकंवर्ज्यमितिकेचिन्महर्षयोमन्यंतइति मुहूर्तकेसदुमेविठ्ठलदीक्षीतेस्तु १

KKSU LIBRARY RAMTEK 441 106 M-1610 Dist. Nagpur

Checked 2012

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

स्फुटगतिसंबंध्यधिकवत्सरत्वन्मध्यगतिसंबंध्यधिकवत्सरस्यापिविवाहावेनेक=
कर्मसुवर्ज्यत्वमुक्तं तथाहि चेत्स्पष्टयावाप्यथमध्यमयोर्वाराश्यंतरं यत्रच चांद्रवर्षे वा
गुरुर्नयायादधिवत्सरोधिमासेनतुल्यःसुशुभेषुवर्ज्यइति अस्यार्थस्वीकायां
स्पष्टयेतिकेवलंस्पष्टग्रहणंमध्यस्फुटगयोरन्योन्यसापेक्षाभावद्योतनार्थं तत्रय
स्मिंश्चांद्रसंवत्सरेगुरोर्मध्यगत्याराश्यंतरप्रवेशोभवति स्फुटगत्याश्चेन्नभवति तदाधि
कसंवत्सरदोषःस्यात अन्यथाकेवलंस्पष्टग्रहणंव्यर्थंस्यात वाप्ययेतिप्रकारांतरेण
दोषसंभवार्थंनितुविकल्पार्थं तथागयेतिनिरपेक्ष्यमध्यग्रहणाद्यस्मिंश्चांद्रसंवत्सरे=

को. ख. स्फुटगत्याराश्यंतरप्रवेशोभवतिमध्यगत्यानभवतितदाप्यधिकवत्सरदोषस्यात् अयं
२ दोषःकदाचित्संभाव्यतेनतुसार्वकालइत्यर्थः एवंचान्यतरप्रकारेणाधिवत्सरदोषःसम
धिगतश्चेदधिमासवच्छुभेषुवर्जनीयः चांद्रवर्षइत्यादिसइत्यंतपदेश्चांद्रस्यैवसंबद्ध
त्विनचांद्रप्रभवादिवत्सरस्यव्यवहारसद्भावात्सर्वत्रदोषसंभवः यदातुमध्यस्फुटगति
भ्यांराश्यंतरप्रवेशाभावस्तदाकैमुतिकन्यायेनसुतरांदोषसंभवइति नन्वत्रमाधवेन
केचिन्महर्षयोमन्यंतइत्येवेनपरमतमेवद्योतितंनस्वमतमितिचेत् अतएवनअ श्री.
सि न्यमतंस्वमतेनहिनिवेश्यंयदिनिवेशितंतर्हिदूषितव्यंनोचेत्स्वमतमेवेतिन्यायविद्भि २

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

४

रुकत्वात अतएवेक्तंविवाहवृंदावने परमतेस्वमतेतन्निवेशितं यदिन दूषितमा
हतमेवतदिति अस्यार्थटीकायां स्वमतेस्वमतमध्येनिवेशितं निक्षिप्तंपरमतं
यदिनदूषितंतदातन्मतं आदृतं स्वीकृतमेवेत्यर्थः अत्राधिवत्सरविषयकान्यन्या
न्यपिचवचनान्युदाहरामः चेत्स्पष्टगयासुरराजमंत्रीराश्यंतरंनैतिच चांद्रवर्षे
ज्ञेयोधिसंवत्सरसंज्ञकोयंविवाहकर्मादयनुरोधकृत्स्यात १ चांद्राब्देयदिधिष
नयाति स नोंचान्यंराशिंचेदधिकमासेधिमोवस्यात् द्वयाहुर्मिहिरवराहकस्यपाद्यावै
वाहाद्यखिलशुभेषुवर्जनीयः २ चांद्राब्दमध्येस्फुटयातुगयाराश्यंतरंनैवगुरुः
नौ चेत्स्वेद्राव्देमध्यगयागुरो यायाद्राशीचाधिसंवत्सरस्यात् गीर्वाणानांवर्जनीयास्त ति

का०रव० मयातः तदाधिसंवत्सरसंज्ञकोयंशुभेषुवर्ज्योधिकमासवत्स्यात अत्रवर्षाब्दशब्दौ
२ संवत्सरेपर्यायौ ननुनूतनग्रंथकारैरलिखनादधिवत्सरलक्षणंनिर्मूलमितिचेन्नैव
वं किंसर्वाणिलक्षणानिसर्वैरपिनिबंधिभिरुदाहृत्तव्यान्येवेतिवाउतान्यतरेणोक्त नु
हतस्यतदन्येनोनुस्मरणेप्रामाण्यंनास्तीतिवा नाद्यः तथात्वेह्येकनिबंधस्या
का तु अन्येसर्वेनिबंधाः पुस्तकलेखकवदभिनवग्रंथनिबंधारोनस्युरिति तदु का
पादानेकश्चिदपिनप्रवर्तेत अतएवनद्वितीयोपि विज्ञानेश्वरादिस्यमाधवादिभि श्री
र्लेखनात तददृष्टस्यहेमाद्र्यादिभिर्लेखनात तददृष्टस्यान्यैरितिसकलग्रंथपरी ३

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

तेः सर्वसमंतत्वात् एवंप्रकृतेरप्यधिवत्सरविषायकानांमाधवस्यद्रुमादिनिबं॰
धानामुपलभ्यमानानामुक्तरीत्यासकलबाधकलेशराहित्येननिष्कलंकं किमियनाः
श्वासः तस्मान्निबंधेयनाश्वासेप्रतिप्रसंगोदुर्वार एव अन्यथात्रिकांडमंडनेन
मि-ताभि परःशतानिपुनराधानानिकेवलंस्ववाक्येनैवोक्तानि नहितेषांसर्वमूलभूताश्रुतिर्वा
स्मृतिर्वासत्वंकेनापिदृश्यते तथापितदुक्तमात्रेणैवतत्क्रियते तथाविज्ञानेश्वरादिस
कलग्रंथकारास्स्पष्टस्मृत्यर्थसारूप्यकिंकोमात्रेणैव दंपत्योर्देशकालविशेषेणमातृ
पितृत्राशौचवत्संपूर्णमेवदशाह हाव्याशौचंनिःशंकमनुष्ठीयते तथातिनत्तने
मं

का॰ख॰ षुनिर्णयसिंधुमयूखकौस्तुभभट्टोजिदीक्षितकृन्निबंधप्रतिग्रंथेषुभिनवाःशा॰
४ स्त्रार्थाःभूयांसःप्रतिपादितास्तेपियुक्तिमुपादेयंवचनंबालकादपि अन्यत्तृणमि युक्त
पक्ष वज्यात्ज्यमप्युक्तं पद्मजन्मनेतिन्यायेनगुणपातिभिः शिष्टैराद्रियतएव एवंस॰
तितितोप्यतिप्राचीनाउक्तमाधवादिनिबंधाःकुतोनादरणीयाइतिद्वे नन्वधिवत्सर॰
स्यगुरुसंबधत्वाद्गुरुःक्रांतिचारलुप्तत्वाद्वचदन्येपिगुरुभवादोषाइतिसामान्यप्रवृत्तः
मूहूर्ततत्त्वटीकानुसारेणयस्मिन्देशेबार्हस्पत्यमानेनव्यवहारप्रसिद्धिस्तद्विषयो श्री॰
यमधिवत्सरदोषइतिचेत् नचैत्रशुक्लप्रतिपदुपक्रमकेसर्वदेशप्रवृत्तचांद्रव॰ ४

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

स्तरेधिवत्सरदोषविधायकानांवक्ष्यमाणरुद्रविंशाद्यादिवाक्यानांवैयर्थ्यापत्तेःवक्राति चारलुप्तास्वविशेषबाधकवचनाभावाच्च असतिबाधकेऽन्यपरत्ववर्णनेप्रमाणाभावाच्च एवंचयथाबार्हस्पत्येवक्रातिचारदोषौयथावानर्मदाभागीरथ्यंतरेलुप्तवत्स
रेधिवत्सर रदोषस्तथाचांद्रवत्सरेदोषानियम्यतइत्यास्तांविस्तरः अधुनैतत्प्रसंगेनैवलुप्तलक्षणमुच्यते तत्रमदनरत्नेउक्तः अतिचारतरोजीवस्तंराशिंनैतिचेद्यदि लुप्तसंवत्सरोज्ञेयःसर्वधर्मबहिष्कृतइति पूर्वराशिशेषंसमतिक्रम्यराश्यंतरसंचारोतिचारस्तंप्राप्तोगुरुः पुनःस्तंराशियदिनैतितदालुप्तसंवत्सरःसर्वधर्मबहिष्कृतोज्ञेयइत्याशेको

का·स्व स्क्रमः यतुएकस्मिन्वत्सरेजीवस्यद्वौ द्वाशित्रयंयदि लुप्तःसंवत्सरोनामनिंदितःस
५ वेकर्मस्विति मुहूर्तः तत्तटीकाकारधृतवाक्यंतत्त्वतोषमार्तंडनिर्णयसिंधुमयूखकौस्तुभमुहूर्तकल्पद्रुमचिंतामणिचूडामण्याद्यनेकनिबंधेष्वयंग्रंतानुपलब्धत्वात्तन्मूलकवाक्यांतराभावाच्चस्वकपोलकल्पितमित्युपेक्ष्यं अनुपलब्धत्वेतुस्वयमप्युपेक्षणीयंपरिक्षकैरिति एवंचपूर्वराशिशेषंसमतिक्रम्येत्यादिपूर्वीनिमित्तेसत्यपिलुप्तवत्सरःपाक्षिकइत्युक्तंभवति तथाचविश्वतेवसिष्टगुरुभ्यां वृषेमेषझषेकुंभेयद्यतीचारगोगुरुः नतत्रकाललोपःस्यादित्याहगालवोमुनिरिति मुहूर्तचूडामणिकारेणा श्री·
५

5.

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

पि यदिमेषेदति वारगोगुरुर्नपुनरेति निजप्रथमस्थितिं भवतिलुप्तसमाह्वयकुंभ
योर्हेषवृश्चिकयोर्यदिनस्थितइति देशतोप्यपवादः संस्कारमयूखेस्मर्यते लुप्ताब्द
दोषोत्रिमतेनमध्येसोमोद्भवायाःसुरनिम्नगायाइति चूडामणावपि लुप्तवत्सरदोष=
स्तुदेवनयास्तटावधि नर्मदायास्तटादाहुर्वशिष्ठात्रिपराशराइति अन्यत्रापि
गर्गात्रिमांडव्यपराशराद्याभृग्वंगिरःशौनककश्यपाद्याः लुप्ताब्ददोषःप्रवदंतिम
ध्येसोमोद्भवायाःसुरनिम्नगायाइति यतुलुप्तवत्सरदोषस्तुपयोष्णीनर्मदातटा
त् नान्यदेशेष्विति प्राहुर्वसिष्ठात्रिपराशराइति मुहूर्त्ततत्वटीकाकारेणोक्तं तन्नि

का॰ख॰ र्मूलं प्रमाणाभावात् पूर्वापरग्रंथविरोधाच्च अपवादद्वैविध्यमपि मुहूर्त्तकल्पद्रुमे स्म
६ र्यते कुंभाच्चतुष्केतरभेतिचारीन पूर्वराशिंगुरुरेतिवक्री तदाविलुप्ताब्दइहातिनिंद्य
सोमोद्भवाजन्हुसुतांतरालेइति चिंतामणावपि गोजांत्यकुंभेतरभेतिचारगोनोपूर्व
राशिंगुरुरेतिवक्रितः तदाविलुप्ताब्दइहातिनिंदितःशुभेषुरेवासुरनिम्नगांतरइति
राशिभोगावच्छिन्नमासतोप्यस्यापवादश्चूडामणौस्मर्यते मासान्द्वेशैकादशवप्रभु
ज्यराशेर्यदाराशिमुपैतिजीवः भुक्त्वेनपूर्वंचपुनस्तथापिनलुप्तसंवत्सरमाहुरार्याइ श्री॰
ति एदपवादत्रैविध्यमुक्तंमुहूर्त्तसर्वस्वे मधुनाद्यष्टकेजीवेचेद्वीग्द्वामासतः ६

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

राश्यंतरगतोवक्री पुनस्तद्यदिनैति चेत् तदाख्योविलुप्ताब्दोविवाहादिषुवर्जि
तः नर्मदाजाह्नवीमध्येनान्यदेशेषुनिंदितइति लुप्ताब्दलक्षणंनिरूप्येदानीमे
तत्प्रसंगेनैवातिचारादिगुरुभयादोषान्निरूप्यंते तत्रातिचारोनामगतिबाहुल्ये
न पूर्वराशिशेषंसमतिक्रम्यराश्यंतरसंचारइति पुनर्वहणफलगतिवैचित्र्येः
णपूर्वे २ राशौसंचारोवक्रत्वं अत्रवर्ज्यमुक्तंप्रमिताक्षरायांरामदैवज्ञकृतायांवा
स्येनयात्रोद्वाहप्रतिष्ठांचग्रहचूडाव्रतादिकं वर्जयेद्यत्नतश्चैव जीवेवक्रातिचा
रगेइति यद्यप्यत्रजीवेवक्रातिचारगइतिपदेनयावताकालेनगुरोर्वक्रातिचार

का·ख· गयोर्निवृत्तिपूर्वकमार्गत्वेनपूर्ववत्स्थितिपर्यंतयात्रोद्वाहादिकनकार्यमितिगम्य
७ ते तथापिकतिचिद्दिनत्यागानंतरंप्रतिप्रसवोपिराजमार्तंडादौध्वन्यते तथाहि
वक्रातिचारगेजीवेवर्जयेत्तदनंतरंव्रतोद्वाहादिचूडायामष्टाविंशतिवासरान्
वसिष्ठः अतिचारगतेजीवेवर्जयेत्तदनंतरं व्रतोद्वाहादिकार्येषुह्यष्टाविंश
तिवासरानित्यादि इदमपिदेशविशेषेव्यवतिष्ठते उक्तंचमाण्डव्येन यत्राति
चारदोषोस्तिवर्जयेत्तत्रवासरान् अष्टाविंशतिसंख्याकान्चूडोद्वाहादिकर्मसु श्री·
अतिचारगतोदोषोरेवायाउत्तरेतटे नान्यदेशेष्वितिमाहुर्वसिष्ठात्रिपराशरा ७

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

इति वृद्धवसिष्ठः वक्रातिचारो धिषणस्य नित्यो यस्यां तु संक्रमणि नर्मदायाः उदक्प्रदेशे क्षयवत्सरोपि निंद्योऽधिकाद्वत्सर सर्वदेशे इति नृसिंहः वक्रातिचारो खलु नर्मदाया सौम्यप्रदेशेति विसर्जनीयो तत्रैव खलु ताद्दृश ऋषोदि दोषः स वैत्र वर्ज्योऽधिकवत्सरश्चेति लल्लः यस्मिंश्च वत्सरः सूरेः स्फुसंक्रांति वर्जितः सोऽधिसंवत्सरः सर्वदेशे कर्मसु गर्हित इति च्यवनः वाक्पतेः स्पष्टसंक्रांतिवर्जितश्चाद्ववत्सरः अधिवत्सरजो दोषो सर्वदेशे समः स्मृत इति न चान्येपि गुरुभया दोषा इति सामान्यप्रवृत्तत्वव्याख्यानवत्तद्देव बार्हस्पत्यवत्सरव्यवहार

को·ख·
८
राहित्ये देशेऽधिवत्सरदोषाभाव इति वाच्यं विशेषानुपजीवनप्रवृत्तस्य सामान्यतस्तत्व्याख्यानस्य वक्रातिचारादिषु वाक्यांतरमूलकतया व्यवस्थाप्यमानत्वाद्विशेषोपजीवनप्रवृत्तानां प्रागुक्तवसिष्ठादि वाक्यानां तु सर्वदेशे अधिवत्सरदोषकीर्तनेन व्यवस्थाप्यमानत्वात् न चान्येपीति पदसामर्थ्यादेव दोषाभावोऽस्त्विति वाच्यं पौरुषेयत्वेन श्रुतिवत्स्वतः प्रमाणाभावात् स्वतंत्रप्रमाणांतरमूलकत्वस्य चानुपलंभेन न तन्मूलतयापि प्रामाण्यनिश्चय इति तन्मूलकानुमा श्री·
नस्याप्यनुदयात् तस्मान्नैवंविधतत्व्याख्यानं विभीषिकमात्रेणैव बार्हस्पत्यस्य ८

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

न्यवत्सरेऽधिवत्सरदोषाभावसिद्धिः । अत्रचपुरोडाशंचतुर्धाकरोत्याग्नेयंचतु
र्धाकरोतीत्यादौसामान्यविशेषे उपसंहारवदन्येपीत्यादिवार्हस्पत्यव्यवहाररहिते
देशेदोषाभावप्रतिपादकसामान्यतत्वव्याख्यानस्यरघुवसिष्ठादिवचनेषूपसं
हारस्यैवोचितत्वात् । अतएवमीमांसावासनावासितांतःकरणानांधर्मशास्त्रधि
ष्ठुयांतानांयथाकथंचिद्विशेषव्यवस्थासंभवेप्रमाणशून्यस्वीकारस्यहृदयशल्यत्वा
त्सर्वदोषासंभावनंयुक्तमितिप्रतीयते । अत्रबहुवक्तव्यमपिविस्तरभीतेर्ग्रीहकामा
वाच्चनोच्यतइतिसंक्षेपः

KKSU LIBRARY
RAMTEK
441 106
M-1610
Dist. Nagpur

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

[OrderDescription]
,CREATED=22.10.20 15:29
,TRANSFERRED=2020/10/22 at 15:31:09
,PAGES=9
,TYPE=STD
,NAME=S0004410
,Book Name=M-1610-KALENDUSHEKHAR
,ORDER_TEXT=
,[PAGELIST]
,FILE1=00000001.TIF
,FILE2=00000002.TIF
,FILE3=00000003.TIF
,FILE4=00000004.TIF
,FILE5=00000005.TIF
,FILE6=00000006.TIF
,FILE7=00000007.TIF
,FILE8=00000008.TIF
,FILE9=00000009.TIF
,

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection